आम्बिष्ट अम्बा अम्बाला अम्बिका अम्बरम् अम्बष्ठः ।

**अबद्ध** त्रि० बन्ध–क्त न०त०। १असंबद्धे २अन्वयबोधयोग्यताशून्ये परस्परविरुद्धे वाक्ये च यथा "यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता माता तु मम बन्ध्यासीदपुत्रश्च पितामहः" इत्यादि वाक्यम् । ३ बद्धभिन्ने मुक्ते च ।

**अबद्धमुख** त्रि० न बद्धं यथेच्छवादितया अप्रतिरुद्धं मुखमास्यक्रिया यस्य स्त्रियां वा ङीप् । अप्रियवादिनि "सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियमिति" मनुनाऽप्रियवचनकथनस्य निषेधेऽपि तदुल्लङ्घनेन अप्रियवाक्यप्रयोक्तृत्वेन तस्य तथात्वम् ।

**अबध** पु० न बधस्ताडनं देहे आघातः प्राणवियोजनं वा अभावे न०त०। ताड़नाभावे । "शिष्यशिष्टिरबधेनाशक्तौ वेणुदलेनेति" मिता० स्मृतिः । १प्राणवियोजनाभावे च ।

**अबधा** स्त्री न बध्यतेऽस्मते लम्बेन । लीलावत्युक्ते त्रिकोणादि क्षेत्रे लम्बोभयपार्श्वस्थे भूमिखण्डे। न, बाध्यते आबाध्यते वा, अबाधा आवाधाऽप्यत्र । तदानयनञ्च"त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भुवा हृतो लब्ध्या। द्विस्था भूरूनयुता दलिताऽबाधे तयोः स्यातामिति" लीला०।"दशसप्तदशप्रमौ भुजौ त्रिभुजे यत्र नवप्रमा मही। अबधे वद लम्बकं तथा गणितं गाणितिकाशु तत्र मे" इति लीला० अबधोद्देशकः।

**अबध्य** त्रि० बधमर्हति यत् न०त० । १बधानर्हे प्राणवियोग फलकव्यापारो हिंसात्र बधः । "अबध्याञ्च स्त्रियं प्राहुस्तिर्यग्योनिगतामपि" स्मृतिः । २बधदण्डानर्हे ब्राह्मणे च "बधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने । तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसः । अविशेषेण सर्वेषामेष दण्डविधिः स्मृतः । बधादृते ब्राह्मणस्य न बधं ब्राह्मणोऽर्हति" मिता० स्मृतिः । "उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमौ। चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत् त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणोव्रजेदिति" मनुः बन्ध–बा० क्यप् । २अयोग्यवाक्ये हे०मे० च ।

**अबन्धक** न० बध्यते स्वधनमितरत्र आधीयते बन्ध आधीयमानद्रव्यं स नास्ति यत्र कप् । १आधिशून्ये ऋणादाने । "अशीतिभागोवृद्धिः स्यान्मासिमासि सबन्धके । वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा" या० "अन्यथा बन्धकरहिते" मिता० "दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु" या० व्याख्यायाम् "ब्राह्मणादयोवर्णा अबन्धके सबन्धके वा स्वकृतां वृद्धिं सर्वासु जातिषु दद्युः" विज्ञा०। अस्य पा०उपकादिगणपाठात् "उपकादिभ्योऽन्यतरस्यामद्वन्द्वे च" पा०सूत्रेण गोत्रप्रत्ययस्य बहुत्वे लुग्विधानात् कश्चिच्चित् २ गोत्रप्रवर्त्तके ऋषावपि अस्य वृत्तिः ।

**अबन्धुर** त्रि० न०त० । १ उन्नतानतभिन्ने २ शोभनभिन्ने ३ विधुरबन्धुरबन्धुरमैक्षतेति" माघः ।

**अबन्ध्य** त्रि० बन्ध्यः अफलः । १सफले,"अबन्ध्यं दिवसं कुर्यात् दानाध्ययनकर्मभिः" स्मृतिः २अफलभिन्ने फलकाले फलयुक्ते वृक्षे पु० ।

**अबल** न० न बलं सामर्थ्यमुत्कर्षोवाऽभावे न०त०। १ बलाभावे "प्रायश्चित्तं प्रदातव्यं दृष्ट्वा तस्य बलाबलम्" स्मृतिः । "गन्धानाञ्च रसानाञ्च ज्ञात्वा चार्थबलाबलम्" मनुः । बलमुत्कर्षमबलमनुत्कर्षम्" इति कुल्लू० । नास्ति बलं यस्य। २बलहीने दुर्बले त्रि० "पञ्चवर्गीबलेनोनो न हर्षस्थानमाश्रितः अबलोऽयं लग्नदर्शीति नी०ता०। अबलस्वकुलाशिनो झषान्निजनीडद्रुमपीड़िनः खगान्" नैष०। ३नार्यां स्त्री"भुजलतां जड़तामबलाजनः"रघुः।"हृदये वहसि गिरीन्द्रौ त्रिभुवनजयिनी कटाक्षेण । अबला त्वं यदि मन्ये के बलवन्तोन जानीम" इत्युद्भटः । ५ब० । ४वरुणवृक्षे पु० । [रोगादिनिमित्ते देहस्य कृशीभावे ।

**अबलिमन्** पु० बलस्य भावः इमनिच् विरोधे न०त० ।

**अबाध** पु० अभावे न०त० । १बाधाभावे २ प्रतिबन्धाभावे । नास्ति बाधो यस्य । ३ बाधशून्ये त्रि० । बाधस्य असत्त्वं स चानुमापकहेतौ दोषभेदः वह्न्यभाववद्ह्रदत्वं हि बाध दोषः यत्सत्त्वेऽनुमितेः प्रतिबन्धः तस्य हेतुदूषकत्वमिति नैया०। नास्ति बाधा पीड़ायस्य । ४पीड़ाशून्ये त्रि० ।

**अबाधक** त्रि० न०त०। १बाधकभिन्ने अनुगुणे। नास्ति । बाधो यस्य वा कप्। २बाधशून्ये त्रि० ।

**अबाधित** त्रि० न बाधितः । बाधितभिन्ने यथार्थे "अबाधितागृहीतविषयत्वं प्रमात्वमिति" वृद्धाः । तद्वति तत्प्रकारकं ज्ञानं हि प्रमा तच्च तदभाववति तत्प्रकारकज्ञानेन प्रतिबध्यते तथा च तदभाववति तत्प्रकारकताशून्यत्वेन ज्ञानस्ययाथार्थ्यं, तादृशज्ञानविषयत्वात् विषयस्याबाधितत्वम् । [अप्रतिरोध्ये ।

**अबाध्य** त्रि० न बाध्यते अपोद्यते बाध–ण्यत् न०त० ।

**अबाल** त्रि० न०त० । १ बालभिन्ने पूर्णे चन्द्रादौ २तरुणे च ।

**अबिन्धन** पु० आप एव इन्धनमुद्दीपनसाधनमस्य । बाड़वाग्नौ "अबिन्धनं वह्निमसौ बिभर्त्ति" रघुः ।